# ॥ રાસક્રીડા ૧ ॥

.. rAsakrIDA 1 ..

sanskritdocuments.org

August 2, 2016

# .. rAsakrIDA 1 ..

# ॥ રાસક્રીડા ૧ ॥

Document Information

Text title : rAsakrIDA 1 from Gargasamhita
File name : rAsakrIDA1gargasamhitA.itx
Location : doc_vishhnu
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Vishwas Bhide vrbhide at rediffmail.com
Proofread by : Vishwas Bhide, PSA Easwaran psaeaswaran at gmail.com
Description-comments : gargasamhitA
Acknowledge-Permission: Vishwas Bhide http://satsangdhara.net/
Latest update : February 3, 2016
Send corrections to : sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

sanskritdocuments.org

# ॥ રાસક્રીડા ૧ ॥

શ્રીગર્ગ ઉવાચ -
હેમન્તે માસિ પૂર્વસ્મિન્ રાકાયાં રાધિકેશ્વરઃ ।
વંશીં વશકરીં દધ્મૌ યથા વૃન્દાવને પુરા ॥ ૧॥

ધ્વનિર્બભૂવ તસ્યાશ્ચ સર્વેષામાહરન્મનઃ ।
નિશમ્ય ગોપ્યઃ સન્નિન્નાઃ કામખેદેન તત્રસુઃ ॥ ૨॥

રુન્ધન્નમ્બુભૃતશ્ચમત્કૃતિપરં કુર્વન્મુહુસ્ત્વમ્બરં
ધ્યાનાદ્ધન્ત નયન્સનન્દનમુખાન્વિસ્મેરયન્વેધસમ્ ।
ઔત્સુક્યાદ્બલિભિર્બલિં ચટુલયન્ભોગેન્દ્રમાઘૂર્ણયન્
ભિન્દન્નણ્ડકટાહભિત્તિમભિતો બભ્રામ વંશીધ્વનિઃ ॥ ૩ ॥

અથોદગાચ્ચન્દ્રમાસ્તુ ચર્ષણીનાં શુચો મૃજન્ ।
યથા પ્રિયાયા રાજેન્દ્ર વિદેશાદાગતઃ પ્રિયઃ ॥ ૪॥

તદૈવ યમુના રાજંસ્તનું દિવ્યં દધાર હ ।
વૃન્દાવનં ગિરીન્દ્રશ્ચ વ્રજભૂમિશ્ચ માનદ ॥ ૫॥

કૃષ્ણા નદી જયતિ યત્ર મણીન્દ્રમુક્તા-
   માણિક્યશુભ્રહરિતા કરતોલિકાભિઃ ।
વૈદૂર્યનીલકહરિદ્ધરિવજ્રપીત-
   સોપાનમણ્ડપયુતાભિરતિસ્ફુરન્તી ॥ ૬॥

સ્વચ્છન્દસૂત્પતિતમત્સ્યગણૈર્વહન્તી
   સચ્છ્યામલેન વપુષાઘગણં હરન્તી ।
ઉત્તુઙ્ગલોલલહરી કમલૈર્લસન્તી
   કૃષ્ણા નદી જયતિ કૃષ્ણગૃહે લુઠન્તી ॥ ૭॥

ગોવર્ધનં ભજ ગિરીં શતચન્દ્રયુક્તં
   મન્દારચન્દનલતાવૃતકલ્પવૃક્ષમ્ ।
શ્રીરાસમણ્ડલયુતં મણિમણ્ડપાઢ્યં
   કોટીરમઞ્જુલનિકુઞ્જકુટીરકોટિમ્ ॥ ૮॥

વૃન્દાવનં ચ યમુનાતટનીરતીર-
   સમ્પૃક્તમન્દગમનૈરતિગન્ધવાતૈઃ ।
તત્કમ્પિતં ચ સુરભીકૃતસર્વદેશં
   શ્રીખણ્ડકુઙ્કુમમૃદાગુરુચર્ચિતં તમ્ ॥ ૯॥

જુષ્ટં વસન્તનવપલ્લવપુષ્પરઙ્ગૈ-
  ર્મન્દારચન્દનસુચમ્પકનીપનિમ્બૈઃ ।
આમ્રાતકામ્રપનસાગુરુનાગરઙ્ગૈઃ
  શ્રીતાલપિપ્પલવટૈર્નવનારિકેલૈઃ ॥ ૧૦॥

ખર્જૂરશ્રીફલલવઙ્ગવિરાજમાન-
  મઞ્જીરશાલકતમાલકદમ્બયુક્તમ્ ।
સન્તાનકુન્દબદરીકદલીસિતાઢ્યં
  શ્રીશાલ્મલીબકુલકેતકિસચ્છિરીષમ્ ॥ ૧૧॥

સન્મોદિનીજલજવૃન્દમનોહરાભં
  વૃન્દારકં વરવનં તુલસીલતાઢ્યમ્ ।
શ્રીમલ્લિકામૃતલતામધુમાધવીભિઃ
  સંરાજિતં સ્મર નૃપેન્દ્ર વ્રજસ્ય મધ્યે ॥ ૧૨॥

વંશીવટં ચ કલકણ્ઠવિહઙ્ગમૈશ્ચ
  કૃષ્ણાતટે ચ પુલિનં કિલ બાલુકાઢ્યમ્ ।
શ્રીપાટલૈર્મધુકકિંશુકસત્પ્રિયાલૈ-
  રૌદુમ્બરૈઃ ક્રમુકદ્રાક્ષકપિત્થયુક્તમ્ ॥ ૧૩॥

શ્રીકોવિદારપિચુમન્દલતાર્જુનૈશ્ચ
  પ્લક્ષૈરશોકસરલૈઃ સુરદારુભિશ્ચ ।
જમ્બૂસુવેત્રનલકુબ્જકસ્વર્ણયૂથી-
  પુન્નાગનાગકુટજૈઃ કુરબૈર્વૃતં ચ ॥ ૧૪॥

ચક્રાહ્વસારસશુકૈઃ સિતરાજહંસૈઃ ।
  કારણ્ડવૈશ્ચ જલકુક્કુટકૂજિતં ચ ॥ ૧૫॥

દાત્યૂહકોકિલકપોતકનીલકણ્ઠૈ- ।
  ર્નૃત્યન્મયૂરકલરાવવૃતં સ્મર ત્વમ્ ॥ ૧૬॥

શ્યામાચકોરકલખઞ્જનસારિકાભિઃ
  પારાવતૈર્ભ્રમરતિત્તિરતિત્તિરીભિઃ ।
શ્રીકાઞ્ચનીમધુલતામધુયૂથિકાભિઃ
  સંવેષ્ટિતં હરિણમર્કટમર્કટીભિઃ ॥ ૧૭॥

શ્રીપદ્મરાગશિખરં ચ નિકુઞ્જગેહં
  શ્રીકૌસ્તુભેન્દ્રમણિરાજિવિરાજમાનમ્ ।
કોટીન્દુમણ્ડલવિતાનગણૈશ્ચ હૈમૈઃ
  શ્રીપટ્ટસૂત્રરચિતૈર્મણિતોરણાઢ્યમ્ ॥ ૧૮॥

મુક્તાવૃતૈઃ કનકપીતપતત્પતાકૈઃ
પારાવતૈઃ સિતપતત્રિભિરાવૃતઞ્ચ ।
મન્દારકુન્દકરવીરકયૂથિકાનાં
માલાવિચિત્રરચિતં નવચમ્પકાનામ્ ॥ ૧૯॥

નાગેશપદ્મહરિચન્દનપલ્લવાનાં
શ્રીમાલતીકુરબકાઞ્ચનયૂથિકાનામ્ ।
માલાભિરાવૃતમનઙ્ગહરં ગૃહં ત-
ત્સદ્રત્નદર્પણવૃતં સિતચામરૈશ્ચ ॥ ૨૦॥

સિંહાસનૈશ્ચ નવપલ્લવપુષ્પયુક્તૈઃ
શય્યાસનૈઃ કનકવિદ્રુમપાદવૃન્દૈઃ ।
શ્રીચન્દનાગુરુજલૈર્મકરન્દસઙ્ઘૈઃ
કસ્તૂરિકામુદિતકુઙ્કુમચર્ચિતં તત્ ॥ ૨૧॥

એજદ્વસન્તતરુપલ્લવમેવ વાતૈઃ
શીતૈર્ગજેન્દ્રગમનૈઃ સુરભીકૃતાઙ્ગમ્ ।
એતાદૃશં હરિનિકુઞ્જગૃહં સ્મર ત્વં
સન્નમ્રશાખતરુયુક્તમતીવ પુષ્પૈઃ ॥ ૨૨॥

શ્રીવેણુગીતં બહુકામવર્દ્ધનં નિશમ્ય સર્વા વ્રજયોષિતો નૃપ ।
શ્રીકૃષ્ણકાન્તેન ગૃહીતમાનસા વિસૃજ્ય કર્માણિ સમાયયુર્વને ॥ ૨૩ ॥

રુદ્ધા યાઃ પતિભી રાજન્કૃષ્ણેન હૃતમાનસાઃ ।
સ્થૂલં શરીરં તાસ્ત્યક્ત્વા ત્વરં કૃષ્ણાન્તિકં યયુઃ ॥ ૨૪॥

સિંહાસને હેમદુકૂલસંયુતે મધ્યે સ્થિતં સુન્દરનન્દનન્દનમ્ ।
શ્રીસુન્દરી રાધિકયા સમં પરં ગલે દધાનં મધુમાલતીસ્રજમ્ ॥ ૨૫॥

શ્યામં પ્રભાતાર્કકિરીટિનં હરિં સ્ફુરત્પ્રભં શ્રીમુરલીમનોહરમ્ ।
પીતામ્બરં મન્મથરાશિમોહનં વ્રજસ્ત્રિયસ્તં દદૃશુઃ સમાગતાઃ ॥ ૨૬॥

દૃષ્ટ્વા પ્રિયાઃ પ્રિયતમં મત્સ્યકુણ્ડલિનં હરિમ્ ।
ગોપ્યો મૂર્ચ્છાં ગતાઃ સદ્યો ભૂપ ચાલક્ષિતોદ્યમાઃ ॥ ૨૭॥

સાન્ત્વયામાસ તાઃ કૃષ્ણો મિષ્ટવાક્યૈઃ સુધાસમૈઃ ।
તદા ગોપ્યો વનોદ્દેશે સર્વાશ્ચૈતન્યતાં ગતાઃ ॥ ૨૮॥

કૃષ્ણં ગદ્ગદયા વાચા સ્તુત્વા ભીતાઃ સ્ત્રિયો વરાઃ ।
ત્યક્ત્વા વિરહજં દુઃખં ગોવિન્દં દદૃશુઃ પ્રિયમ્ ॥ ૨૯॥

વૃન્દાવને ભ્રાજમાને માલતીવનસઙ્કુલે ।

દિવ્યદ્રુમલતાજાલે મધુપધ્વનિનાદિતે ॥ ૩૦॥

વિચચાર હરિઃ સાક્ષાદ્દેવો મદનમોહનઃ ।
પદ્માભં પદ્મહસ્તેન ગૃહીત્વા રાધિકાકરમ્ ॥ ૩૧॥

પ્રહસન્ભગવાન્સાક્ષાદાયયૌ યમુનાતટમ્ ।
કૃષ્ણાતીરે નિકુઞ્જે વૈ શ્રીકૃષ્ણો નિષસાદ હ ॥ ૩૨॥

તસ્મિન્ગૃહે મધુપતેઃ શૃણુ ગોપિકાનાં
શ્રીકૃષ્ણચન્દ્રચરણસ્મરણાવૃતાનામ્ ।
ઝઙ્કારનૂપુરઝણત્કરકઙ્કણાનાં
મઞ્જીરરત્નવિચલત્કટિકિઙ્કિણીનામ્ ॥ ૩૩॥

સ્મેરદ્યુતિસ્ફુટચમત્કૃતગણ્ડદેશૈઃ
શ્રીદન્તપઙ્ક્તિવિલસત્તડિતાલિલેશૈઃ ।
કોટીરહારહરિતાઙ્ગદભૂષિતાનાં
બાલાર્કમણ્ડલવિકુણ્ડલમણ્ડિતાનામ્ ॥ ૩૪॥

તાસાં તુ કાપિ યુવતી કથિતા ચ મુગ્ધા
મધ્યાપિ કાપિ તરુણી રુચિરા પ્રગલ્ભા ।
કાચિત્તરું વિનયતી મધુરં હસન્તી
કાચિત્સખી મદયુતા સુવને વ્રજન્તી ॥ ૩૫॥

સન્તાડ્ય તામપિ કરેણ તુ કાપ્યધાવ-
ત્સઙ્ગૃહ્ય કાપિ ભુવને કમલૈર્જઘાન ।
કાચિચ્છ્લથત્કનકહારમુપાજહાર
કાચિત્પ્રમુક્તકબરી તુ વિહારમત્તા ॥ ૩૬॥

શ્રીજાહ્નવી ચ યમુના મધુ માધવી ચ
શીલા રમા શશિમુખી વિરજા સુશીલા ।
ચન્દ્રાનના ચ લલિતા ત્વચલા વિશાખા
માયાલ્પ એવ કથિતા ભવને ત્વસઙ્ખ્યાઃ ॥ ૩૭॥

લીલાતપત્રમતિમૌક્તિકદામજાલં
નીત્વા ચલન્તિ મણિભૂમિષુ તત્ર કાશ્ચિત્ ।
શ્રીચામરવ્યજનદણ્ડધરા વયસ્યાઃ
કાશ્ચિદ્વ્રજન્તિ ધૃતપીતપતત્પતાકાઃ ॥ ૩૮॥

નૃત્યન્તિ તત્ર હરિવેષધરાસ્તુ કાશ્ચિ-
દ્વીણાકરા મધુરતાલમૃદઙ્ગહસ્તાઃ ।
વંશીધરાશ્ચ વૃષભાનુસુતાઃ સુવેષાઃ

केयुरकुण्डलयुता मणिवेत्रहस्ताः ॥ ३९॥

સદ્ભાવભાવરસતાલયુતસ્મિતાક્તૈ-
ઝંકારનૂપુરયુતૈર્વિશદૈઃ કટાક્ષૈઃ ।
સઙ્ગીતનૃત્યવિદિતૈર્ભ્રુકુટીવિભઙ્ગૈ
રાધાં હરિં ચ સતતં પરિતોષયન્ત્યઃ ॥ ૪૦॥

તસ્મિન્નિકુઞ્જભવને યમુનાતટેઽપિ
વંશીવટે વનધરાનિકટે હરિં તમ્ ।
શ્રીરાધયા ચ ગિરિરાજતટં વ્રજન્તં
નન્દાત્મજં ચ નટવેષધરં સ્મર ત્વમ્ ॥ ૪૧॥

શ્રીપદ્મરાગનખદીપ્તિપદારવિન્દં
ઝઙ્કારનૂપુરધરં સ્ફુરદઙ્ગદેશમ્ ।
કુર્વન્તમેવ તુ પદારુણભૂમિદેશં
શ્રીમત્પરાગસુરુચાલમિતસ્તતસ્તુ ॥ ૪૨॥

લક્ષ્મીકરાબ્જપરિલાલિતજાનુદેશં
રમ્ભોરુ પીતવસનં તુ કૃશોદરાભમ્ ।
રોમાવલિભ્રમરનાભિસરસ્ત્રિરેખં
કાઞ્ચીધરં ભૃગુપદં મણીકૌસ્તુભાઢ્યમ્ ॥ ૪૩ ॥

શ્રીવત્સહારરુચિરં નવમેઘનીલં
પીતામ્બરં કરિકરસ્ફુટબાહુદણ્ડમ્ ।
રત્નાઙ્ગદં ચ મણિકઙ્કણપદ્મહસ્તં
શ્રીરાજહંસવરકન્ધરશોભમાનમ્ ॥ ૪૪॥

શ્રીકમ્બુકણ્ઠલલિતં વિલસત્કપોલં
મધ્યં તુ નિમ્નચિબુકં કિલ કુન્દદન્તમ્ ।
બિમ્બાધરં સ્મિતલસચ્છુકચઞ્ચુનાસં
પીયૂષકલ્પવચનં પ્રચલત્કટાક્ષમ્ ॥ ૪૫॥

શ્રીપુણ્ડરીકદલનેત્રમનઙ્ગલીલં
ભ્રૂમણ્ડલસ્મિતગુણાવૃતકામચાપમ્ ।
વિદ્યુચ્છટોચ્છલિતરત્નકિરીટકોટિં
માર્તણ્ડમણ્ડલવિકુણ્ડલમણ્ડિતાભમ્ ॥ ૪૬॥

વંશીધરં ત્વહિવિલોલગુડાલકાઢ્યં
રાધાપતિં સજલપદ્મમુખં ચલન્તમ્ ।
કન્દર્પકોટિઘનમાનહરં કૃશાઙ્ગં

વંશીવટે નટવરં ભજ સર્વથા ત્વમ્ ॥ ૪૭॥

આરક્તરક્તનખચન્દ્રપદાબ્જશોભાં
મઞ્જીરનૂપુરરણત્કટિકિઙ્કિણીકામ્ ।
શ્રીઘણ્ટિકાકનકકઙ્કણશબ્દમુક્તાં
રાધાં દધામિ તરુપુઞ્જનિકુઞ્જમધ્યે ॥ ૪૮॥

નીલામ્બરૈઃ કનકરશ્મિતટસ્ફુરદ્ભિઃ
શ્રીભાનુજાતટમરુદ્ગતિચઞ્ચલાઙ્ગૈઃ ।
સૂક્ષ્મસ્વરૂપલલિતૈરતિગૌરવર્ણાં
રાસેશ્વરીં ભજ મનોહરમન્દહાસામ્ ॥ ૪૯॥

બાલાર્કમણ્ડલમહાઙ્ગદરત્નહારાં
તાટઙ્કતોરણમણીન્દ્રમનોહરાભામ્ ।
શ્રીકણ્ઠભાલસુમનોનવપઞ્ચદામ્નીં
રત્નાઙ્ગુલીયલલિતાં વ્રજરાજપત્નીમ્ ॥ ૫૦॥

ચૂડામણિદ્યુતિલસત્સ્ફુરદર્દ્ધચન્દ્રાં
ગ્રૈવેયકાલપનપત્રવિચિત્રરૂપામ્ ।
શ્રીપટ્ટસૂત્રમણીપટ્ટચલદ્વિદામ્નીં
સ્ફૂર્જ્જત્સહસ્રદલપદ્મધરાં ભજસ્વ ॥ ૫૧॥

શ્રીબાહુકઙ્કણલસત્કુચરત્નદીપ્તિં
શ્રીનાસિકાભરણભૂષિતગણ્ડદેશામ્ ।
સદ્યૌવનાલસગતિં કલસર્પવેણીં
મધ્યેન્દુકોટિવદનાં સ્ફુટચમ્પકાભામ્ ॥ ૫૨॥

સદ્ભાવભાવસહિતાં નવપદ્મનેત્રાં
સ્ફૂર્જ્જત્સ્મિતદ્યુતિકલાં પ્રચલત્કટાક્ષામ્ ।
કૃષ્ણપ્રિયાં લલિતકુન્તલપુઞ્જલાભાં
મન્દારહારમધુરભ્રમરીરવાઢ્યામ્ ॥ ૫૩ ॥

શ્રીખણ્ડકુઙ્કુમમૃદાગુરુવારિસિક્તાં
શ્રીબિન્દુકીરુચિરપત્રવિચિત્રચિત્રામ્ ।
સન્તાનપત્રરુચિરામલમઞ્જનાભાં
રાસેશ્વરીં ગજગતિં ભજ પદ્મિનીં તામ્ ॥ ૫૪॥

એતાદૃશીં રતિવરાં તુ સમેત્ય કૃષ્ણો
ગચ્છન્નિકુઞ્જવનજાલવિલોકનાય ।
ધાવન્તિ તત્ર મણિછત્રધરાશ્ચ ગોપ્યો

નીત્વા તથા ચમરચારુપતત્પતાકાઃ ॥ ૫૫॥

ષડ્રાગમેવ વરધૈવતમધ્યમાદ્યૈ-
ર્ગાયન્તમાદિપુરુષં ભજ નન્દપુત્રમ્ ।
ષટ્ત્રિંશતસ્તદનુવર્ત્તિતરાગિણીનાં
વંશીવરેણ લલિતેન વરં વ્રજન્તમ્ ॥ ૫૬॥

શૃઙ્ગારવીરકરુણાદ્ભુતહાસ્યરૌદ્ર-
બીભત્સશાન્તકભયાનકનિત્યયુક્તમ્ ।
ભક્તપ્રિયં વ્રજવધૂમુખપદ્મભૃઙ્ગં
યોગીન્દ્રહૃત્કમલવિસ્ફુરદઙ્ઘ્રિયુગ્મમ્ ॥ ૫૭॥

ક્ષેત્રજ્ઞમાદિપુરુષં સ્વધિયજ્ઞરૂપં
સર્વેશ્વરં સકલકારણકારણેશમ્ ।
કૃષ્ણં હરિં પ્રકૃતિપૂરષયોઃ પુમાંસં
સર્વં નિરસ્તકપટં નિજતેજસેહ ॥ ૫૮॥

યં વૈ સ્તુવન્તિ શિવધર્મસુરેશશેષ-
લોકેશસિદ્ધિદગણેશસુરાદયોઽપિ ।
રાધારમાપ્રકૃતિભૂવિરજાસ્વરાદ્યા
વેદા ભજન્તિ સતતં તમહં ભજામિ ॥ ૫૯॥

ઇતિ ગર્ગસંહિતાયાં અશ્વમેધખણ્ડે દ્વિચત્વારિંશોઽધ્યાયઃ રાસક્રીડા સમાપ્તા ।

Garga Samhita, Ashvamedhakhanda, Adhaya 42
Encoded by Vishwas Bhide vrbhide at rediffmail.com http://satsangdhara.net/
Proofread by PSA Easwaran psaeaswaran at gmail.com

.. rAsakrIDA 1 ..
was typeset on August 2, 2016

Please send corrections to sanskrit@cheerful.com